श्रीगणेशाय नमः प्रणाम्य शिरसा विष्णुं त्रैलोक्याधिपतिं विभुम् ॥ नाना
शास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ॥१॥ अनधीत्य निशास्त्राणि नरो जाना
ति तत्वतः ॥ धर्मोपदेशं विख्यातं कार्याकार्यं शुभाशुभम् २ तदहं संप्रव
क्ष्यामि नराणां हितकाम्यया येन विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते ३
मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च द्विषत्संप्रयोगश्च पण्डितोप्यव
सीदति ४ दुष्टाभार्या शठं मित्रं भृत्याश्चोत्तरदायकाः ससर्पे च गृहे वासो
मृत्युरेव न संशयः ॥५॥ आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि आत्मा
नं सततं रक्षेद्दारैरपि धनैरपि ६ त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं
त्यजेत् ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ७ चलत्येकेन

निर्विवाहं सदृशे कुले ।१५। नदीनांच नखीनांच शृंगिणां शस्त्रपाणिनां
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ।१६॥ विषादप्यऽमृतं ग्राह्यं अ
मेध्यादपि कांचनम् ॥ नीचादुत्तमां विद्यां स्त्रीरत्नं दुःकुलादपि ॥१७॥ स्त्री
णां द्विगुणाहारो लज्जा तासां चतुर्गुणा । षड्गुणो व्यवसायश्च कामश्चा
ष्टगुणाः स्मृतः ॥१८॥ इति वृद्धचाणाक्ये राजनीतिशास्त्रे प्रथमोऽध्या
यः ।१। अनृतं साहसं माया मूर्खत्वमतिलोभता । अशौचं निर्दयत्वं
च स्त्रीणां दोषस्वभावजाः ।१। भोज्यं भोजनशक्तिश्च रतिवरस्त्रियः ॥ वि
भवो दानशक्तिश्च नाल्पस्य तपसः फलम् ।२॥ यस्य पुत्रो वशीभूतो भा
र्या छन्दानुवर्त्तिनी । विभवे चाति संतोषस्तस्य स्वर्ग इहैव हि ।३॥ ते पुत्रा ये

पादेन तिष्ठत्येकेन परिशिरतः ॥ नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ८ प
स्मिन्देशेन सन्मानो न वृत्तिर्न च बांधवाः ॥ न च विद्यागमो यत्र वासं तत्र न का
रयेत् ॥ ९ ॥ धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पंचमः ॥ पंच यत्र न विद्यन्ते
न तत्र दिवसं वसेत् १० लोकयात्राभयं लज्जा दाक्षिण्यं त्यागशीलता ॥ पंच
यत्र न विद्यन्ते न कुर्यात्तत्र संगतिम् ॥ ११ ॥ जानीयात्प्रेषणे भृत्यान्बांधवान्व्य
सनागमे ॥ मित्रं चापत्कालेषु भार्यां च विभवक्षये १२ आतुरे व्यसने प्रा
प्ते दुर्भिक्षे शत्रुविग्रहे ॥ राजद्वारे श्मशाने च यस्तिष्ठति स बांधवः ॥ १३ ॥ यो ध्रु
वाणि परित्यज्य अध्रुवाणि च सेवते ॥ ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमे
व च ॥ १४ ॥ वरयेत्कुलजां प्राज्ञो विरूपामपि कन्यकाम् रूपवतीं न नीचां

शैलेशैलेनमाणिक्यंमौक्तिकंनगजेगजे॥साधवोनास्तिसर्वत्रचंदनंनवनेव
ने ११ मूर्षस्तुपरिहर्तव्यःप्रत्यक्षोद्विपदःपशुः भिद्यतेवाक्यशल्येनअदृष्टःकं
टकोयथा १२ खलानांकंटकानांचद्विविधैवप्रतिक्रिया उपानन्मुखभं
गोदूरतोपिविसर्जनम् १३ पुत्रास्तुविविधैःशीलैर्नियोज्याःसततंबुधैः नी
तिज्ञाशुद्धसंपन्नाभवंतिखलुपूजिताः १४ मातावैरीपिताशत्रुर्बालोयाभ्यां
नपाठितः नशोभतेसभामध्येहंसमध्येबकोयथा १५ श्लोकेनतथार्द्धे
नपादेनैकाक्षरेणवा अवंध्यंदिवसंकुर्याद्दानाध्ययनकर्मभिः १६
अपमानंपुरस्कृत्यमानंकृत्वातुपृष्ठतः स्वकार्यंसाधयेत्प्राज्ञःकार्यध्वं
सोहिमूर्खता १७ इतिवृद्धचाणक्येराजनीतिशास्त्रेद्वितीयोऽध्यायः २॥

पितुर्भक्तो स पिता यस्तु पोषकः तन्मित्रं यस्य विश्वासः सा भार्य्या या नि
र्वृतिदा ॥४ परोक्षे कार्य्यहंतारं प्रत्यक्षे प्रियवादिनम् वर्जयेत्तादृशं मि
त्रं विषकुंभं पयोमुखम् ५ नाविश्वसेत्कुमित्रस्य मित्रस्यापि न विश्वसे
त् ॥ कदाचित्कुपितं मित्रं सर्वं गुह्यं प्रकाशयेत् ६ मनसा चिंतितं कार्य्यं
वाचा नैव प्रकाशयेत् मंत्ररक्षां गूढात्मा कार्य्यसिद्धिश्च जायते ७
सर्प्पः क्रूरः खलः क्रूरः सर्प्पात्क्रूरतरः खलः मंत्रेणाशाम्यते सर्प्पो दु
र्जनः केन शाम्यति ८ एतदर्थे कुलीनानां नृपाः कुर्वंति संग्रहम्।
आदिमध्यावसानेपि न त्यजंति विक्रियाम्। ९ चलंतोपि न
मर्य्यादां भजंति किल सागराः सागरा भेदमिच्छंति चलंतोपि न साधवः ॥१०॥

मीलं सीलमसनालस्यंपारितंत्वंमित्रसंग्रहम् अचौर अन्तरो चैव पंचैता
न्यत्तपो ऽतिमी ९ पठितेगुरुशिते चापित पासर्वं गुरोषु च ॥ धर्मार्थकाम
मोक्षेषु सर्वत्र कुशलो भवेत् १० यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति
किम् । लोचनाभ्यां विहीनस्य दर्पण: किं करिष्यति ११ गुणो भूषयते रूपं
 शीलं भूषयते कुलम् सिद्धिर्भूषयते विद्यां भोगो भूषयते धनम् १२ अ
गुणो नहतं रूपं अशीलेन हतं कुलम् असाध्या च हता विद्या अभोगेन
 हतं धनम् १३ गुणं पक्षसिमा रूपं शीलं पक्षसिमा कुलम् सिद्धिं प
क्षसिमा विद्या भोगो पक्षसिमा धनम् १४ क्षमा खड्गं करे यस्य दुर्जन:
किं करिष्यति अतृणे पतितो वह्निः स्वयमेवोपशाम्यति १५ धर्मेम

लालयेत्पंचवर्षाणि दशवर्षाणि ताडयेत् प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाच
रेत् ॥२ लालनाद्बहवो दोषास्ताडनाद्बहवो गुणाः ॥ तस्मात्पुत्रं च शिष्यं च ता
डयेन्न तु लालयेत् ॥३॥ रूपयौवनसंपन्ना विशालकुलसंभवाः विद्याही
नान शोभंते निर्गंधा इव किंशुकाः ४ एकेनापि वृक्षेण दह्यमानेन व
ह्निना दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा ५ एकेनापि सुपुत्रेण सु
सपेन सुवासितं नाम्र वासितं सर्वरी दीपकं चन्द्र प्रभाते रविदीपकः॥
त्रैलोक्यदीपकं धर्म सुपुत्रे कुलदीपकः ६ परान्नं परस्त्रं च परशय्या प ८३
रस्त्रियः परवेश्मनि वासं च शक्रस्यापि श्रियं हरेत् ७ अभ्रच्छायापात
रागः दग्निनी च संगे जलम् वेश्यारागं कुमित्रं च षडेते बुद्बुदोपमाः ८

दन्तापताडनैः ।।यथाच धनुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुरोण न
कर्मणा ५ पार्थिवस्तु वक्तव्याभिः भृत्यानां च वलेवलसरां ।। एतत्संवर्धते
राज्यं लक्ष्मी च पश्यस्य हि । ६ वदवेदांगतत्वज्ञो जपहोमपरायणः आशी
र्वादपरो नित्यमेष राजपुरोहितः ७ प्रवीणः प्रेषकोदक्षोपरचित्तोपल
५ क्षकः ।।धीरो परपोक्तवादी षडभक्त्यो विधीयते ।। ८ पितृपितामहोदक्षो ५
शास्त्रज्ञो मिष्टपाचकः शौचयुक्तः पाकज्ञः सूपकारः स उच्यते ९ आ
5 युर्वेदकृताभ्यासः सर्वज्ञः प्रियदर्शनः उक्तिहेतुः समायुक्तः एषवैद्यो
विधीयते १० मेधावी विप्रा कुलपुत्राज्ञः सत्यवादी जितेन्द्रियः ।। सर्वस्य
हितकृल्लोके एषसाधुश्च लेखकः ११ समस्तं ह पश्शास्त्रज्ञो वाधने

पंचकामंचपथ्याशक्तिर्नहापयेत् ॥ ब्रह्मसमे मुहूर्ते चोत्थाय चिंतयेदात्मनो
हितम् १० आत्मनो मुखदोषेण बध्यंते शुकसारिकाः बकास्तत्र न बध्यं
ते मौनं सर्वार्थसाधकम् ११ ॥ इति वृद्धचाणक्ये राजनीतिशास्त्रे तृ
तीयोऽध्यायः ३ कः कालः कानि मित्राणि को देशः को व्ययागमौ ॥ कस्याहं
क्व च मे शक्तिः इति चिंत्यं मुहुर्मुहुः १ जनिता चोपनेता च यस्तु विद्यां प्रयच्छ
ति अन्नदाता भयत्राता पंचैते पितरः स्मृताः ॥ २ ॥ राजपत्नी गुरोः पत्नी
मित्रपत्नी तथैव च ॥ पत्नीमाता स्वमाता च पंचैते मातरः स्मृताः ३
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ॥ पतिरेकः कुलस्त्रीणां स
र्वस्याभ्यागतो गुरुः ॥ ४ ॥ यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणा छे

११ नी०

कुशिष्यशिष्यम्र १ कुराज्यराज्येन कुतः प्रजासुखं कुमित्रमित्रेण कुतो
निवृतिः कुदारदारैश्चा कुतो ग्रहेरतिः कुशिष्यमध्यापयतः कुतोयशः २
शिष्याशांविशति ज्ञात्वा प्रदीप्तं शान्तिपो नरः सजेष्यति रिपून्सर्वान्
६ त्रैजपश्चभविष्यति ३ अर्थनाशं मनस्तापं गृहेदुश्चरितानि च व
चनं चापमानं च मतिमान्नप्रकाशयेत् ४ प्रभूतकार्य्यमल्पं वापो
6 नरः कर्त्तुमिच्छति सर्वारंभेषु तत्कार्य्यं सिंहस्येकपदं यथा ५ इन्द्रिया ६
णि तु संयम्य बकवत्परितो नरः देशकालबलं ज्ञात्वा सर्वकार्य्याणि
साधयेत् ६ प्रागुत्थानं च युद्धं च विभागं चैव बंधुषु स्त्रियमाक्र
म्य भुंजीत शिक्षेच्चत्वारि कुक्कुटात् ७ गूढमैथुनं धानं च काले चा

सुजितश्रमः॥ श्लो० व्याधे पथ्यं गुणोपेतं अश्रवा यत्नो विधीयते १२ त्यजेत्स्वामिन
मसुयं अतुष्या क्षपणं त्यजेत् क्षपणाद्विप्रोवृत्तं तस्मात्तु सकतो सनम्।
१३ स्वारसं सुष्टरस्त ध्यं क्रूरं व्याजिनं दम्भम् असंतुष्टम भक्तं च त्यजेत् भृत्यं
नराधिपः १४ अतिलाभप्रशान्तानां च पतिनैव दूरतः स्वामिनामुग्र
रूपाणाम त्स्यानामिव दस्यते १५ वेदशास्त्ररूपान् स्मृति षड्धरा
द्विजाः क्रीडयामपि कृपास्य धर्मसद्दशांपदम् १६ पयःपानं भुजंगानां के
वलं विषवर्द्धनं उपदेशो हि मूर्खाणां प्रकोपाय न शांतये १७ इति वृद्धचा
णाक्ये राजनीतिशास्त्रे चतुर्थोऽध्यायः ४ वरं न राज्यं कुराज्यराज्यं
वरं न मित्रं न कुमित्रमित्रम् वरं न दारा न कुदारदारा वरं न शिष्यं न

रा०नी०

विप्रयोर्विप्रवह्निश्च दंपत्योः स्वामिभृत्ययोः अंतरेण न गंतव्यं हलस्य वृ
षभस्य च १६ हस्ती हस्तसहस्रेण शतहस्तेन वाजिनः शृं।।गिणो वै त्रह
स्तेन देशत्यागेन दुर्जनः १७ हस्तिनोंकुशहस्तेन कुशहस्तेन वाजिनां
७ शृंगिणो वै त्रहस्तेन खड्गहस्तेन दुर्जनः १८ पादाभ्यां न स्पृशेदग्निं
न गुरुं च वाडवम् न गां वा न कुमारीं च शिशुं न विचक्षणः १९ इति ७
वृद्धचाणक्ये राजनीतिशास्त्रे पंचमोऽध्यायः ५ तुष्यमर्पेन गच्छी
पात्तध्वधर्मजलिकर्मणा मूर्खवृन्दानुवर्त्तते पपात ...नपरि
ताः १ अनुलोमेन बलिनं प्रतिलोमेन दुर्बलम् समतुल्यं बलं श
त्रुं विनयेन बलेन च २ यस्य यस्य हि यो भावस्तस्य तस्य हितं धरः

नंपसंकटे ॥ अविश्वसम सज्ञाच पंचरि श्येतू वायसात् ९ वहासौ अस्य
संतुष्टः श्रीरि शि श्येत् गर्द्दभात् स भिन्नो लघुचेतनः स्वामि भक्तश्च सूर
श्च षडे ते श्वान तो गुणाः १० सुश्रान्तोति वार बाहीशीतो संच विंदति
संतोषी च सदा पुष्टः श्रीरि शि श्येत् गर्द्दभात् ११ एतानि गुणा विंशति
यो जानाति स परिश्रुतः स जेष्यति रिपून् सर्वान् अजपश्च भविष्यति
१२ धन धान्य प्रयोगे षु विद्यासंग्रहणे षु च आहारे व्यवहारे च त्यक्त
लज्जा सुखी भवेत् १३ संतोषामृत तृप्तानां यत्सुखं शांतशासम् ॥
कुतस्त द्धन लब्धानामितश्चेत श्च धावता १४ संतोषः त्रिषु कर्त
व्यः स्वदारे भोजने धने त्रिषु चैव न कर्तव्यो दाने चाध्ययने तप १५॥

राज०नी०

श्री ११

अर्थेन हीनस्य नरः पुत्रुषस्याल्पमेधसः ।। उच्छिद्यंते क्रियाः सर्वा ग्रीष्मे कुन्न
दीपथा १० विभवाज्जत्र पूज्यंते न शरीरासि देहिनः ।। चौरा लोपि नरः
श्रेष्ठो यस्यास्ति विपुलं धनम् ११ जिता धनवता वश्या सभा जिता ।। जितं
कृषीभिर्दारिद्र्यं गोभिरभ्यागतो जितः १२ वाल्मीकं मधुजलं च शुक्लप
क्षे च चन्द्रमा ।। राजद्रव्यं च भैक्ष्यं च स्तोकं स्तोकं न वर्धते १३ शनैर
र्थाः शनैर्विद्याः शनैः पर्वतमारोहेत् ।। शनैर्धर्मस्य कामस्य व्यापारस्य
शनैः शनैः १४ अंजनस्य क्षयं दृष्ट्वा वाल्मीकस्य च संचयः ।। अवंध्यं दि
वसं कुर्याद्दानाध्ययनकर्मसु १५ हृदमेव हि पारिष्यं अपमेव कुली
नता अपमेव परो धर्मो यावता तन्त्रसोऽप्यथ: १६ आमंत्रयस्व च

८ ८

शुद्धिनाम्

अनुप्रविश्यमेधावीशत्रिप्रमात्मवश्रांनयेत् ३ यद्रुवीर्य्यवलोराजातेजश्च स
विदांवरः रूपयौवनसंपन्नि: स्त्रीरांवल्लभमनुत्तमम् ४ नान्यंतरलैभी
ध्यंगत्वापस्यमहीरुहात् सरलस्तत्रच्छिद्यंते कुब्जास्तिष्ठंति पादपाः
५ यत्रोदकंतत्रवसंति हंसास्तथैवशुष्कंपरिवर्जयंति पूर्णासरस्तुन
राश्रयंति हंसस्यतुल्येननरेणभाव्यं ६ उपार्जितानामर्थानां त्या
गएवहिरक्षणं तडागोदरसंस्थानांपरिवाहइवांभसां ७ यस्यार्थ
स्तस्यमित्राणियस्यार्थास्तस्यवांधवाः यस्यार्थाःसपुमांल्लोकेयस्या
र्थास्सजीविताः ८ त्यजंतिमित्राणिधनेपुत्रांश्चदारांश्चसुहृ
ज्जनाश्च तमर्थवंतंपुनराश्रयंति अर्थोहिलोकेपुरुषस्यवंधुः ९

राः॥ सामार्घ्योप्रियंवदः॥ पासद्भावेनतुष्यंतिदेवाः सत्पुरुषाद्विजाः॥ इतरा
दानमानेनवाक्प्रदानेनपंडिताः ७ उत्तमान्प्रणिपातेनच मूर्खंमोनियो
जयेत्। प्रसनेनप्रोजपेच्छत्रुर्भिर्वधर्मोनियोजयेत् ८ नाग्निस्तृप्य
ति काष्ठेन नापगानामिहोदधिः॥ नांतकः सर्वभूतानांपुंसांवामलो
चना ९ महतः पार्थ्यमानस्य विपत्तिरपिशोभते॥ दंतभग्नोहिना
गानांसाध्योगिरिविदारणे॥ १०॥ अपुत्रस्यगृहंशून्यंदिशासून्यं
विबांधवाः॥ मूर्खस्यहृदयंशून्यंसर्वंशून्यंदरिद्रता॥ नारिकोकेल
समाकाराद्दृश्यंतेकेपिसज्जनाः॥ इतरेवकाराबाहिरेवमनोरमाः॥ १२॥
यस्यपुत्रानविद्वांसोनशूरानचयोगिनः॥ अंधकारकुलेतस्यनष्ट

त्वारि निर्गमे सार्द्धपंचकम् अत्यर्थव्ययसंयोगान् चिरं भजते श्रियः
१७ त्यज दुर्जनसंसर्गं भज साधुसमागमम् कुरु पुण्यमहोरात्रं स्मर नि
त्यमनित्यताम् १८ इति वृद्धचाणाक्ये राजनीतिशास्त्रे षष्ठोऽध्यायः ६ जी
र्णस्त्व तपस्वी च सूरश्चापकृतव्रतः मद्यपा स्त्री सतीत्वं च राजन्न श्र
द्दधाम्यहम् स्त्रीविज्ञानस्य पतिरूपा स्त्री कथमजो कलहप्रिया ॥ उत्तरोत्तर
वादी च सा ज्ञेया न जरा जरा ॥ २ ॥ यस्य भार्या शुचिर्दक्षा भर्तारमनुगा
मिनी । नित्यं मधुरभाषी शास्त्री प्रोक्ता न चापरा ३ यस्य भार्या गुरा भ्रा
च भर्तारमनुगामिनी स्वपा अस्ति नात्या स्तु संतुष्ट शास्त्री च हरेः
प्रिया ॥ ४ या भार्या गृहदक्षा या भार्या पतिव्रता सा भार्या या मतिप्रा

पराज्ञं दभैर्विना पक्रीयते सुधर्मः ॥१॥ कालेन रिपुराणां संधिः कालेमित्रारिवि
ग्रहः ॥ कार्यकारणमाश्रित्य कालं सपति पण्डितः ॥२॥ कालः सृजति भूता
नि कालः संहरते प्रजाम्। कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥३॥
अग्निहोत्रफलं शरीरवृत्तिफलं श्रुतिः रतिपुत्रफला दारा दत्तभुक्तंफलं
१० धनम् ॥४॥ व्याधितस्यार्थहीनस्य देशांतरगतस्य च ॥ नरस्य शोकतप्त १०
स्य सुहृद्दर्शनमौषधम् ॥५॥ नित्यं स्नाता सुगंधा च नित्यं च प्रियवा
10 दिनी। अल्पाशाल्पभाषा च देवता सा कुमानुषी ॥६॥ संततमंगले
पुत्रा सती च धर्मवत्सला ॥ सततं हृदयायुक्ता सततं भर्तृगामिनी ॥७॥
भर्तुस्ववचनं नं मर्या सततं प्रभोजनम् ॥ रूपं पा च क्रिया का सर्वभाग्य

त२

दि॰ २

चन्द्रेव शार्वरी १३ किंकरोति नरः प्राज्ञः प्रेष्यमानः स्वकर्मभिः ॥ प्रायेणा भिमनुष्यस्य बुद्धिः कर्मानुसारिणी ॥१४॥ तस्मात् स्वर्गे गाधेयं दुपुराकेन पूर्यते । यामहद्भिरपि क्षिपैः पूर्णा नैवावगम्यते ॥१५॥ यस्मिन्जीवंति विप्राश्च मित्राणि बांधवानि च ॥ सफलं जीवितं तस्य आत्मार्थे कोन्न जीवति ॥१६॥ दह्यमाना सुतीव्रेण नीचाः परजसाग्निना अशक्तास्तत्पदं गंतुं न तो निन्दां प्रकुर्वते ॥१७॥ इति वज्रुचाराणक्ये राजनीतिशास्त्रे सप्तमोऽध्यायः ७ ॥ नन्दोज नंयरिमुंनं सो षं सा प्रासत पा न करोति पापं ॥ नत्सो हदंय कुतुन

मारोपिः प्रयोजनम् ॥ विक्रियन्ते न घ[illegible]कटाक्षैः गावश्चोर विवर्जिताः ॥१४॥
परीक्षितेषु गुणाः सर्वे मूर्खे दोषास्तु केवलः ॥ तस्मात मूर्ख सहस्रेषु प्राज्ञ एको
न लभ्यते ॥१५॥ श्लोकार्धं च भयत्राणं प्रीति विश्वासभाजनम् केनर
त्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥१६॥ प्रज्ञा व्याप्त शरीरस्य किं करिष्यति
शात्रवः ॥ छत्रोपानह युक्तेन वारि धारा तपं पथा ॥१७॥ एकाक्षरमपि
यस्तु गुरु शिष्यस्तु यो निन्दयेत् ॥१८॥ पियांना सितं दुग्धं जननी दुःख
दो भवेत् ॥१९॥ इति वररुचि प्रणीते राजनीति शास्त्रे प्रथमोऽध्यायः ॥
६ सूपकारं च वैद्यं च मंत्री राणां मंत्रवादिनाम् । स्वामिनं धनिनं मू
र्खं मर्मज्ञं न च कोपयेत् ॥१॥ चिन्तया नाशितं रूपं चिन्तया नाशितं बलम् ॥

११

११

विवर्द्धिनी ॥८॥ हंसो न भाति बलिभोजनवृन्दमध्ये गोमायुमण्डलगतो
न च भाति सिंहः ॥ जात्यो न भाति तुरगः खरयूथमध्ये विद्वान्न भाति पु
रुषेषु निरक्षरेषु ॥९॥ हंसो विभाति नलिनीदलवृन्दमध्ये सिंहो वि
भाति गिरिकंदरकाननेषु जात्यो विभाति तुरगो रणरंगमध्ये विद्वा
न्विभाति पुरुषेषु नि[illegible]चक्षणेषु ॥१०॥ वाजिवारणलोहानां
काष्ठपाषाणवाससां नारीपुरुषतोयानां अंतरं महदंतरम् ॥११॥ अश्वः
सुप्तो गजोन्मत्तो वृषभो काममोहितः अंतःपुरगतो राजा दूरतः परि
वर्जयेत् ॥१२॥ अग्निरापः स्त्रियो मूर्खाः सर्पा राजकुलानि च ॥ नि
त्यं पत्नेन सेव्यानि सद्यः प्राणहराणि च ॥१३॥ गुणाः क्रियन्ते यत्नं कि

कुलहीनेसरस्वती अपत्येस्मरतेनारी गुरौवर्षतिमाधवः ॥८ सर्वरीदीप
कश्चन्द्रः प्रभातेदीपकोरविः ॥त्रैलोक्यदीपकोधर्मः सुपुत्रोकुलदीपकः
१२ ॥९॥ एकेनापिसुपुत्रेराजापमानेनसत्कुलम् ॥शशांकेनैवगगनंए
केनैवोज्वलीकृतम् ॥१०॥ मल्लितीपापिगौरीगीतस्तनेरचमनंदनं १२
पश्यपमनिर्जितावाचहेमाचलस्तिमाचले: ११ जतोपुष्पवतींस्वद्वा
12 शुचिस्नाताजलां[illegible]शयः ॥पुनस्तत्संगभीत्यामंदचलापि
मातुलः १२ नवंगलतिकामंगदपातुईतिरागानिलः ॥कंपन्मूलप
त्तेषमानिनीमानपर्वतान् १३ उपकारिषुयः साधुसाधुत्वस्य को

चिंतयानाश्रितं ज्ञानं व्याधिर्भवति चिंतया ॥२॥ दातृत्व प्रियवक्तृत्वं
धीरत्वमुचितज्ञता ॥ अभ्यासेनैव लभ्यन्ते चत्वारः सहजा गुणाः ॥
३ एकोपि हि वरं पुत्रः पुत्राणां जालिशतैरपि ॥ बहुगर्भपरिक्लेशा
किं न जातो धनंजयः ॥४॥ ज्ञानं दानं तपस्तीर्थं च ज्ञानेषु न
पेषु च ॥ विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुंधरा ॥५॥ माता यस्य
गृहे नास्ति पिता च प्रियवादिनी ॥ अरण्यं तेन गंतव्यं यथारण्यं
तथा गृहम् ॥६॥ उत्तमस्य च वर्णस्य नीचोपि गृहमागतः बालो
वापदिवा वृद्धो सर्वस्याभ्यागतो गुरुः ॥७॥ लक्ष्मीर्लक्षणहीनेव

नकुर्वीत: १९ श्रुचिसुरपीउराचारिं डेपिंडितवादिनी असमर्थेगहांरमै
समर्थोगहभंजने २० इतिवंध्वाराक्ये राजनीतिशास्त्रेनवमोऽध्या
यः ॥ उपदेशेनदानध्यापादशैनाहदशेजने पश्यवानरमूर्षेरासगह
१२ रीगहीरीगहीकृता १ नवुद्धिर्धनलोभायनधान्यसमेसद्धयो: अ १२
वुद्धिंवइमांहछया माविवारसुखीभवेत् २ अधोपयनैउरोपेत्रयगुरो
13 नोतत्रकाजाति: द्विजवरयेरग्रामेरजवै: किंकरिष्यति ३ अतिव्यये
नकर्तव्यो अतिकामान्नवनसेवयेत् अतिरस्मानेकर्तव्यो भो
जनेमन्नमपेधने ४ कृतस्यकेरगं नास्तिपुनरेवनकारयेत् पो

६

उ।

गुणाः अपकारिषु यः साधुः साधुः सद्भिरुच्यते १४ कः स्वादुमोपि कालेन
भवेच्छिद्रप्रदः को विशेषस्तस्य वनेऽन्यमहीरुहेः १५ गुरुरेव परः सचि
रेकः सदः सदा विमोहोनः कलाधरोप्येकः अमुत्र मंत्र समापां गुरुपः
जंगाधरास्सर्वे १६ विद्या मित्रं प्रवासे च भार्या मित्रं गृहेषु च व्याधि
तस्यौषधं मित्रं धर्मो मित्रं मृतस्य च १७ न सुखं धनलुब्धस्य न ध
र्मो दुष्टचेतसः न चापि भाग्यहीनस्य औषधं न जलापुषः १८ ह
स्ते हीव पादे हृदये तले पुरुषाकृतिः शीलकामपरिस्त्रष्टा नीलपंके

र्वेषां ब्रह्मचारिणाम् ब्रह्मचर्यविहीनस्य सर्वे धर्माः निरर्थकाः
११ रिपुराज्ञाऽनिसर्वेषु विषमस्त्रीषु शंठिषु शस्त्रपाणिषु मूर्खेषु
विश्वासो न कर्तव्यः न १२ पापस्य कोऽनुपं कोपं मिथ्यापैशून्यत
१४ त्मतम् द्वेषं परगृहे वासं त्यजेदेतानि बुद्धिमान् खरश्वानगजा १४
न मत्तान् १३ दशावकुभागिरीति उ परा चरते नारि सू
14 तः परिवर्जयेत १४ सूर्यवायुर्नेर्भवाद्भ्युत्स्नान वस्त्रादिकं तपा
मार्जनीरेणुके शाम्ब्रु शक्रस्यापि श्रियं हरेत् १५ परान्नं पर
वस्त्रं च परशय्या परस्त्रियः परवेश्मनिवासं च शक्रस्यापि श्रि

नरः कुरुते मोहात् पूर्वकृत्यं विनश्यति ॥५॥ धन्यो देशः कुलाचारः धन्यो ग्रामः सरित्तटे ॥ धन्या पितृमुखी कन्या धन्यो मातृमुखः सुतः ॥६॥
देवद्रव्येण या वृद्धिर्गुरुद्रव्येण यद् धनम् । तद् धनं कुलनाशाय मृतोऽपि नरकं व्रजेत् ॥७॥ पूंगीफलानि पत्राणि राजहंसं तुरंगमाः ॥ स्थानभ्रष्टा न शोभन्ते सिंहाः सत्पुरुषा गजाः ॥८॥ राजकुलवधूर्विप्रो नियोगी मंत्रिणस्तथा ॥ स्थानभ्रष्टा न शोभन्ते दंताः केशा नखा नराः ॥९॥ तपसा ब्राह्मणा न्रेपाः त्रिपः शस्त्रपारगः ॥ कृषिकर्मकरा वैश्याः शूद्राः प्रेषणकारकाः ॥१०॥ ब्रह्मपाप्यं भवेन्मूलं स

धै २२ इति वृद्धचाणक्ये राजनीतिशास्त्रे दशमोऽध्यायः १०
समाप्तं शुभमस्तु संवत् १८८८ कार्तिकमासे शुक्लपक्षे त्र
योदश्यां पुस्तकमिदमलेखि जगन्नाथेन शुभमस्तु

यंहरेत् १६ कुमार्य्यां च कुमित्रं च कराजानां कुसुहृदम् कुवंशं च
कुदेशं च दूरतः परिवर्जयेत् १७ शुष्कमांसं स्त्रियो वृद्धा बालार्क
स्तनुरात्रौ दधि प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् १८
सुगंधकेतकीपुष्पं कंटकैः परिवेष्टितम् १९ नदीतीरे गवां गोष्ठे
शीरेव तेजसा प्ययेत् आरामेषु कूपादौ च विण्मूत्रं न विसर्ज
येत् २० घृतं नयते करौ दधि त्वन्ये विसर्जयेत् उष्णे दुग्धे
पिकावानांशशकं मांसं कदुष्णं अम् २१ एकांतरप्रदातारं यो
गुरुं न हि मन्यते श्वानयोनिशतं गत्वा चांडालेष्वपि जा